श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री राघवाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री राघवाष्टकम् ॥

भुवनगुप्तये ब्रह्मणार्चितं
    दशरथालये व्यक्तिमागतम्।
जनकनन्दिनीलक्ष्मणान्वितं
    भज मनः सदा राममद्भुतम्॥ 1 ॥

कमललोचनं पापमोचनं
    स्वजनरञ्जनं दैत्यभञ्जनम्।
षडरिमर्दनं बोधवर्धनं
    भज मनः सदा राममद्भुतम्॥ 2 ॥

सुरपतिं ह्ययोध्यापुरे वरे
    सुरतरोः स्थले मण्डपान्तरे।
मणिमयासने सम्यगास्थितं
    भज मनः सदा राममद्भुतम्॥ 3 ॥

अगणितौजसं दण्डसागरं
    प्रणततापसं साधुमानसम्।
अमितभाससं पीतवाससं
    भज मनः सदा राममद्भुतम्॥ 4 ॥

अमरकिन्नरैस्सिद्धचारणै -
    र्मुनिवरैर्नरैरप्सरोगणैः।

परमविद्यया सम्यगर्चितं
भज मनः सदा राममद्भुतम् ॥ 5 ॥

मदनकोटिसौन्दर्यमोहनं
चरणभक्तिभाक्कामदोहनम् ।
हृदयपङ्कजेऽध्यात्महृत्पदं
भज मनः सदा राममद्भुतम् ॥ 6 ॥

चरितविस्तरं कोटिभेषजं
त्रिदशविश्रुतं नामसंस्थितम् ।
जपति शङ्करोऽवाप्ततत्परं
भज मनः सदा राममद्भुतम् ॥ 7 ॥

एतदद्भुतं राघवाष्टकं
प्रतिदिनं पठेद्भक्तिपूर्वकम् ।
तनुमिमां यथाहेयकञ्चुकं
विरहयल्लभेज्ज्योतिरात्मकम् ॥ 8 ॥

॥ इति श्री राघवाष्टकं समाप्तम् ॥